अधीनं करोति वा साति। कात्स्न्येनात्माधीनतया सम्पन्ने तथाभूते तथा क्रियमाणे च । अस्य च सम्पद्यादि-योगे एव साधुत्वम् आत्मसाद्भूतः आत्मसात् सम्पन्नः आत्मसात्कृत इत्यादि। "दुरितैरपि कर्त्तुमात्मसात्" रघुः "अग्नीन् वाप्यात्मसात्कृत्य" या०स्मृतिः । [च ।

**आत्मसिद्ध** त्रि०आत्मना सिद्धः । १स्वयंसिद्धे २अयत्ननिष्पन्ने

**आत्मसिद्धि** स्त्री आत्मरूपा सिद्धिः । आत्मभावलाभे मोक्षे

**आत्मसुख** त्रि० आत्मैव सुखमस्य । आत्मलाभमात्रेण सुखिनि १आत्मैव सुखं सच्चिदानन्दरूपत्वात् । २आत्म-रूपे परमानन्दे न० ।

**आत्मस्थ** त्रि० आत्मने आत्मज्ञानाय तिष्ठते यतते स्था-क ४त० । १आत्मस्वरूपज्ञानाय यतमाने आत्मनि मनसि तिष्ठति स्था-क ७त० । २मनोवृत्तिपदार्थे त्रि० । [ वियोजने ।

**आत्महत्या** स्त्री आत्मनो देहस्य हननम् । देहस्य प्राणै-

**आत्महन्** त्रि०आत्मानं हतवान् हन-क्विप् । "येऽन्यथा स-न्तमात्मानमकर्त्तारं स्वयंप्रभुम् । कर्त्ता भोक्तेति मन्यन्ते तएवात्महनो जनाः," इत्युक्तलक्षणे आत्मनो यथार्थज्ञान-रहिते, १देहाद्यभिमानिनि, "अन्धं तमस्ते प्रविशन्ति ये के चात्मनोजनाः" कठ०उ० "लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् । यस्त्वात्ममुक्त्यै न यतेत मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात्" विवे०चू० । आत्मनो यथार्थज्ञानाभावे आत्महत्वमुक्तम् । "असुर्य्यानाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभि-गच्छन्ति ये के चात्महनोजनाः" ईशोप० । "मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा" भाग० २आत्मघातिनि जने च । आत्मघातिन्शब्दे विवृतिः ।

**आत्माधीन** पु० आत्मनोऽधीनः । १पुत्रे, २श्यालके ३विदू-षके च हेम० ४बलयुक्ते ५स्वाधीने त्रि० ।

**आत्मानुरूप** त्रि० आत्मनोऽनुरूपम् । जातिवृत्तादिना स्व-तुल्ये "तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" रघुः ।

**आत्मापहारक** त्रि० आत्मानमपहरति निह्नुते अप+हृ-ण्वुल् । आत्मनो यथास्वरूपनिह्नवकारिणि "योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते । स पापकृत्तमो लोके स्तेन आत्मापहारकः" मनुः । णिनि । आत्मापहारी अप्यत्र "किं तेन न कृतं पापं चौरेणात्मापहारिणा" स्मृतिः स्त्रियां ङीप् ।

**आत्माराम** त्रि० आत्मा आराममिव रतिस्थानं रति-साधनं वा यस्य । ज्ञानाय यतमाने योगिनि "आत्मा-रामाविहितरतयोर्निर्विकल्पे समाधौ" वेणी० । "आत्म-क्रीडस्य सततं सदात्ममिथुनस्य च । आत्मन्येव सुतृप्तस्य योगसिद्धिर्न दूरतः । यस्त्वात्मव्यतिरेकेण किञ्चिद्विश्वं न पश्यति । आत्मारामः स योगीन्द्रोब्रह्मभूतो भवे-दिति" काशी० उक्ते २योगीन्द्रभेदे च ।

**आत्मालम्भ** पु०६त० । हृदयस्पर्शे "पित्र्यमन्वानुहरणे आत्मा-लम्भेवेक्षणे" कात्या०सू० "आत्मालम्भे हृदयस्पर्शे" रघु० ।

**आत्माशिन्** पु० आत्मानं स्वकुलमश्नाति अश-णिनि ६त० । स्वकुलभक्षके मीने तस्य सकुलभक्षकत्वात् तथात्वम् अतएव "अबलस्वकुलाशिनो झषान्" नै० "मत्स्या इव जना-नित्यं भक्षयन्ति परस्परमिति च" रामा० वर्णितम् ।

**आत्माश्रय** पु०आत्मानमाश्रयति आ+श्रि-अच् ६त० । १स्वस्य स्वापेक्षित्वहेतुकानिष्टप्रसङ्गरूपे तर्कदोषभेदे । तर्कः पञ्चविधः तर्कशब्दे वक्ष्यते तत्र "स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्ग आत्माश्रयः स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा यथा यद्ययं घटएत-द्घटजन्यः स्यात्तदैतद्घटानधिकरणक्षणोत्तरवर्त्ती न स्यात्, यद्ययं घटएतद्घटवृत्तिः स्यात् एतद्घटव्याप्योन स्यात्, यद्ययं घटएतद्घटज्ञानाभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात् एतद्घटभिन्नः स्यादिति वा सर्व्वत्रापाद्यम्" न्यायसूत्रवृत्तिः । २स्वाश्रिते ३चित्ताश्रिते च त्रि०६त० । ४स्वस्याश्रये पु० ।

**आत्मीय** त्रि० आत्मनोऽयम् छ । आत्मसंबन्धिनि । "आ-त्मीयां मतिमादाय कुरु सज्जनरञ्जनम्" सा०द० "किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा" कुमा० "प्रसाद-मात्मीयमिवात्मदर्शः" रघुः अहमेनं प्रज्ञावलेनात्मीयं करिष्यामि" हितो० ।

**आत्मेश्वर** त्रि० आत्मनो मनस ईश्वरः । चित्तविकार-निवारके मनःसंयमकारके "आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवोभवन्ति" कुमा० ।

**आत्मोत्पत्ति** स्त्री आत्मन उत्पत्तिः स्वोपाध्यन्तःकरणवृत्ति-कर्म्मणाऽपूर्व्वदेहसंयोगः । स्वोपाधीभूतान्तःकरणवृत्ति-कर्म्मणाऽपूर्व्वदेहसंयोगरूपे आत्मनो जन्मनि । तदुत्पत्ति-प्रकारः मिताक्षरायां दर्शितो यथा ।

"निमित्तमक्षरः कर्त्ता बोद्धा ब्रह्म गुणी वशी । अजःशरीर ग्रहणात्स जात इति कीर्त्यते" "आत्मनः सकलजगत्प्रप-ञ्चाविर्भावे विद्यासमावेशवशात्समवाय्यसमवायिनिमित्तमि-त्येवं स्वयमेव त्रिविधमपि कारणम् । न पुनःकार्य्यकोटि-निविष्टः यस्मादक्षरोऽविनश्वरः । ननु सत्त्वादिगुणविकारस्य सुखदुःखमोहात्मकस्य कार्य्यभूते जगत्प्रपञ्चे दर्शनाद्गुण-